निरुक्तिः श्रुतौ । "योऽन्तरे नाकाश आसीदन्तरीक्षमभवदीक्षं हि तन्नाम ततः पुरान्तरा वा इदानीमीक्षमभूदिति" तस्मादन्तरीक्षमिति" ।

**अन्तरिक्षप्रा** त्रि० अन्तरिक्षं प्राति पूरयति प्रा—पूरणे विच् । अन्तरिक्षपूरके "अन्तरिक्षप्रां तविषीभिरावृतमिति" ऋ० १,५१,२ । "अन्तरिक्षं द्युलोकं स्वतेजसा प्राति पूरयतीति" विच्, भा० ।

**अन्तरिक्षप्रुत्** त्रि० अन्तरिक्षं प्रवते प्रुङ् गतौ क्विप् । अन्तरिक्षचरे "अन्तरिक्षप्रुद्भिरपोदकाभिरिति" ऋ०१,११६,३।

**अन्तरिक्षसद्** त्रि० अन्तरिक्षे सीदति सञ्चरति सद—गतौ क्विप् । आकाशचारिणि । "हंसः शुचिषद्वसुरन्तरिक्षसदिति ऋ० ४,४०,५ । "अन्तरिक्षसद अन्तरिक्षसञ्चारीति" भा० ।

**अन्तरिक्षसद्य** त्रि० अन्तरिक्षे सद्मम् सदनं सद—भावे यत् । अरिक्षसदने । "उपरि सद्यं वा एष जयति यो जयत्यन्तरिक्षसद्यमिति" कौ० ब्राह्म० ।

**अन्तरिक्ष्य** त्रि० अन्तरिक्षे भवः यत् । अन्तरिक्षभवे । "पवतामन्तरिक्ष्या इति ऋ० ८,२६,५ ।

**अन्तरित** त्रि० अन्तर्-इण-कर्त्तरि क्त २त० । अन्तर्गते अन्तरं व्यवधानं करोतीति णिचि कर्म्मणि क्त । व्यवधानीगते,व्यवधापिते, तिरस्कृते आच्छादिते, "द्विरेफवृन्दान्तरितैः सरोरुहैरिति" किरा० । अपसारिते, "कुर्य्यात् यथास्थानकमन्तरं वेति" लीलावत्यामन्तरशब्दस्य वियोजने प्रयोगात् तत्प्रकृतिकतया वियोजिते च ।

**अन्तरिन्द्रिय** न० कर्म्म० । अन्तःकरणे ।

**अन्तरीक्ष** न० अन्तरिक्षवत्सर्व्वम् । [दके आकाशात्पतितजले

**अन्तरीक्षजल** न० अन्तरीक्षात् पतितं जलम् शा०त० । दिव्यो-

**अन्तरीप** पु० अन्तर्मध्ये गता आपोऽस्य ब०अच् समा० आत ईत्त्वम् । द्वीपभेदे । द्वीपस्य हि जलमध्यस्थत्वात् अन्तर्गतजलत्वात्तथात्वम् इयांस्तु भेदः चतुर्दिक्षु जलसत्त्वे तस्य अन्तरीपत्वम् द्वयोर्दिशोर्जलसत्त्वे द्वीपत्वमित्यनयोर्भेदः । काकाक्षिगोलकन्यायात् 'द्वीपोऽस्त्रियामन्तरीपमित्यत्रापि अस्त्रियामित्यस्य अन्वय इति तेनायं पुंस्त्री० इति केचित् ।

**अन्तरीय** न० अन्तरे भवं गहादित्वात् छ । "नाभौ धृतञ्च यद्वस्त्रमाच्छादयति जानुनी । अन्तरीयं प्रशस्तं तच्छिन्नमुभयान्तयो" रित्येवंलक्षणे परिधाने वस्त्रे । भवाद्यर्थे वूमा० वुञ् । आन्तरीयकः तद्भवे त्रि० ।

**अन्तरे** अव्य० अन्तरेति इण्–ञिच् । मध्ये । "आनन्देऽथान्तरेऽन्तरा, अन्तरेण च मध्ये स्युरित्यमरः" ।

**अन्तरेण** अव्य० अन्तरेति इण–ण टवर्गादित्वेऽपि णस्य नेत्त्वम् । विनार्थे, मध्यार्थे च । तत्र विनार्थे "अन्तरेणाञ्जलिं बद्धा लक्ष्मणस्य प्रसादनमिति" रामायणम् । मध्ये "अन्तरेण वै योनिं गर्भः सञ्चरति" कौ०ब्रा० । "अन्तरेणापां गुणम् इति" स्मृतिः । तत्र विनार्थे, द्वितीयातृतीये पर्यायेण, "श्रीनैशेन विना शम्भुनान्तरेणाच्युतं सुखमिति" मु०बो० । उभयोर्मध्येऽर्थे द्वितीया "अन्तरेणाहवनीयं गार्हपत्यञ्चेति" कौ० ब्रा० ।

**अन्तर्गडु** त्रि० अन्तर्मध्ये गडुरिव निरर्थकः । ग्रीवाप्रदेशे जातस्य गलमांसपिण्डस्य गडोर्यथा निरर्थकत्वम् तद्वन्निरर्थके । "किमनेनान्तर्गडुनेति सर्व्वदर्शन सं० । "अन्तर्गडु निरर्थकमिति" मेदिनिः ।

**अन्तर्गत** त्रि० अन्तः अन्तःकरणे गतः । अन्तःकरणस्थे देहस्थे च "अन्तर्गतं प्राणभृतां हि वेद" इति रघुः । "येषामन्तर्गतं पापं जनानां पुण्यकर्म्मणामिति" पुरा० "अन्तर्गता मदनवह्निशिखावली या सा बाध्यते किमिह चन्दनचर्च्चितेनेति" उद्भटः । अभ्यन्तरस्थे च "अन्तर्गतशवे ग्रामे वृषलस्य च सन्निधाविति" । "नेत्रवक्त्रविकारेण लक्ष्यतेऽन्तर्गतं मनः" इति च मनुः । अन्तर्गतफलारम्भाः शस्यानामिव सम्पदः" इति रघुः ।

**अन्तर्गर्भ** त्रि० अन्तरभ्यन्तरस्थो गर्भोऽस्य । अभ्यन्तरस्थगर्भयुक्ते । "कुशौ समावप्रशीर्णाग्रावनन्तर्गर्भाविति" कात्या० २,२, २१ । गर्भस्य मध्यम् अव्ययी० । गर्भमध्ये अव्य० ।

**अन्तर्गर्भिन्** त्रि० अन्तर्मध्ये गर्भोऽस्त्यस्य इनि । मध्यस्थगर्भयुक्ते । "अनन्तर्गर्भिणं साग्रं कौशं द्विदलमेव चेति" पवित्रलक्षणे कात्यायन स्मृतिः ।

**अन्तर्गृह** न० अन्तःस्थं गृहम् । वाराणसीस्थे सप्तावरणवति स्थानविशेषे "अन्यस्थाने कृतं पापं वाराणस्यां विनश्यति । वाराणस्यां कृतं पापं पञ्चक्रोश्यां विनश्यति । पञ्चक्रोश्यां कृतं पापमन्तर्गृहे विनश्यति" ॥ काशीमा० अन्तर्गेहमप्यत्र "अन्यत्र यत्कृतं पापं तत्काश्यां परिणश्यति वाराणस्यां कृतं पापं मन्तर्गेहे विनश्यति अन्तर्गेहे कृतं पापं पैशाच्यनरकावहमिति" "देवो विरजसः पीठादन्तर्गेहं विवेश हेति" च काशी० । मध्यस्थगृहे च । गृहस्य मध्यम् अव्ययी० गृहस्य मध्ये अव्य० ।

**अन्तर्घण** पु० अन्तर्हन्यते क्रोडीभवत्यस्मिन् अन्तर्+हन–अप्